**SET-4**

**Series GBM**

कोड नं.
**Code No. 49**

रोल नं.
Roll No. | | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **12** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*समयो : होरात्रयम्* | *पूर्णाङ्काः : 100*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 100*

*Time allowed : 3 hours* | *Maximum Marks : 100*

*निर्देशाः :*

*निर्देश :*

***Instructions :***

*संकेताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*

*जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।*

*Answer all questions in Sanskrit, unless instructions are given otherwise.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | 15 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | 15 अङ्काः |
| SECTION B | (Writing Skills in Sanskrit) | |
| खण्डः ग | पठितांश – अवबोधनं संस्कृतसाहित्यस्य परिचयः च (पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय) | 40+10=50 अङ्काः |
| SECTION C | (Reading Comprehension and Introduction to History of Sanskrit Literature) | |
| खण्डः घ | छन्दोऽलङ्काराः (छन्द एवम् अलङ्कार) | 20 अङ्काः |
| SECTION D | (Metres and Figures of Speech) | |

## खण्डः क (SECTION A)
## अपठितांश – अवबोधनम्
## अपठितांश – अवबोधन
## Unseen Reading Comprehension

*15 अङ्काः*

**1.** अधोलिखितम् अनुच्छेद**द्वयं** पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following **two** passages and answer the given questions in Sanskrit.

(क) **प्रथमः अनुच्छेदः**

महर्षिमनुना उक्तम् – 'यत्र नारीणां सम्मानः भवति तत्र सर्वे देवाः रमन्ते ।' भारतवर्षे वैदिक-युगे नारीणां गरिमामयं स्थानमासीत् । वस्तुतः पुरुषः च नारी च जीवनरथस्य द्वौ चक्रौ स्तः । एकेन विना अपि एतस्य जीवनस्य गतिः न भवति । मध्ययुगे यदा वैदेशिकाः आक्रमणकर्तारः भारतवर्षे आगच्छन्, तदा ते स्त्रीभिः सह दुर्व्यवहारम् अकुर्वन् । तदा नारीणां रक्षणार्थं तासां स्थितिः गृहे एव अभवत् । इदानीमपि नारीणां स्थितिः वैदिकयुगसदृशी नास्ति तथापि सर्वकारेण नारीशक्तीकरणार्थं अनेके उपायाः कृताः । अस्मिन् आधुनिके युगे नारी पुरुषैः सह सर्वेषु क्षेत्रेषु कार्यरता अस्ति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2=1$

(i) कस्मिन् युगे नारीणां गरिमामयं स्थानमासीत् ?
(ii) पुरुषः च नारी च कस्य चक्रौ स्तः ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2*

आधुनिके युगे नारी किं करोति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $\frac{1}{2} \times 4=2$

(i) 'आगच्छन्' इति क्रियापदस्य कर्तृपदं किम् ?
(ii) 'अपमानः' इति पदस्य विलोमपदं किम् ?
(iii) 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम् ?
(iv) 'आधुनिके' इति विशेषणस्य विशेष्यं किम् ?

(ख) **द्वितीयः अनुच्छेदः**

मुख्यरूपेण प्रदूषणं त्रिविधं भवति – जलप्रदूषणम्, वायुप्रदूषणम्, ध्वनिप्रदूषणम् च । आधुनिके युगे ध्वनिप्रदूषणस्य समस्या भयावहा अस्ति । अस्मिन् भौतिके युगे यया गत्या आधुनिकीकरणं प्रवर्धते तया एव गत्या ध्वनिप्रदूषणमपि वर्धते । न केवलं यन्त्रालयेषु ध्वनिप्रदूषणस्य समस्या अस्ति, गमनागमनमार्गेषु अपि सा एव स्थितिः । मार्गेषु मोटरवाहनानां अत्यधिकं कोलाहलः भवति । गृहस्योत्सवेष्वपि जनाः ध्वनिविस्तारकयन्त्रैः ध्वनिप्रदूषणं प्रसारयन्ति । अत्यधिकं प्रदूषणं दृष्ट्वा सर्वकारेण अनेके अधिनियमाः विनिर्मिताः । परं जनाः नियमानां पालनं न कुर्वन्ति । एते अधिनियमाः तावत् सफलाः न भविष्यन्ति यावत् एतेषां पालनं न भविष्यति । समाजस्य आत्मनियन्त्रणेन एव एतस्याः समस्यायाः समाधानं सम्भवति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. *1×2=2*

(i) कस्य समस्या भयावहा अस्ति ?

(ii) भौतिके युगे किं प्रवर्धते ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2×1=2*

प्रदूषणस्य समाधानं कथं सम्भवति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. *1×4=4*

(i) 'प्रसारयन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'समारोहः' इति पदस्य किं समानार्थकम् अत्र प्रयुक्तम् ?

(iii) 'पौराणिके' इति पदस्य विलोमपदं किम् ?

(iv) 'अत्यधिकम्' इति विशेषणस्य विशेष्यं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit. *2*

## खण्डः ख (SECTION B)
## संस्कृतेन रचनात्मकलेखनम्
## संस्कृत में रचनात्मक लेखन
## Writing Skills in Sanskrit

*15 अङ्काः*

**2.** मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा पुनः लिखत ।

मञ्जूषा से उचित सङ्केत लेकर निम्नलिखित कथा को पूर्ण करके पुनः लिखिए ।

Complete and rewrite the following story, with the help of the words given in the box below. *1×10=10*

**कथा**

बालगंगाधरतिलकेन (i) __________ उत्तीर्णा । एकं मित्रं तम् अपृच्छत् – 'आजीविकाविषये त्वया (ii) __________ चिन्तनं कृतम् । सर्वकारस्य (iii) __________ संलग्नो भविष्यसि अथवा कस्मिंश्चित् (iv) __________ अधिवक्तृरूपेण कार्यं करिष्यसि ?' सोऽवदत् – 'अहं सर्वकारस्य दासः भवितुं नेच्छामि यत्र प्रतिदिनं (v) __________ वक्तव्यम् भवति ।' कतिपय – दिनान्यनन्तरं मित्रैः श्रुतं यत् बालगंगाधरः (vi) __________ शिक्षकः अभवत् यत्र वेतनमपि न्यूनम् आसीत् । एकं (vii) __________ तस्य पार्श्वे गत्वा अपृच्छत् – 'विधिं पठित्वा भवान् शिक्षकः जातः, किं (viii) __________ दयनीयां स्थितिं न जानासि ?' संतुष्टः बालगंगाधरः सस्मितम् उदतरत् – 'धनस्य (ix) __________ मयि नास्ति । मया यः व्यवसायः स्वीकृतः सः पवित्रः (x) __________ अस्ति ।' एतच्छ्रुत्वा मित्रं मुग्धम् अभवत् ।

**मञ्जूषा**

| |
|---|
| सेवायाम्, किमपि, न्यायालये, विद्यालये, असत्यम्, विधिपरीक्षा, यशःप्रदः, लोभः, शिक्षकाणाम्, मित्रम् । |

**3.** मञ्जूषातः पदानि चित्वा 'कालिदासः' इति विषयम् अधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत ।

मञ्जूषा से पद चुनकर 'कालिदासः' इस विषय पर संस्कृत में **पाँच** वाक्य लिखिए ।

Write **five** sentences in Sanskrit on 'कालिदासः' with the help of the words given in the box below. *1×5=5*

**मञ्जूषा**

| |
|---|
| कविः, अस्ति, काव्यानि, विवाहः, नाटकम्, अभवत्, मूर्खः, प्रसिद्धः, विश्वे, सन्ति, रचनाः, अभिज्ञानशाकुन्तलम्, तुल्यः, कथा, गृहात्, अभवत्, कालीम्, सप्त, सर्वस्वम् । |

## खण्डः ग (SECTION C)

## पठितांश – अवबोधनं संस्कृतसाहित्यस्य परिचयः च

## पठितांश – अवबोधन एवं संस्कृत साहित्य परिचय

## Reading Comprehension and Introduction to History of Sanskrit Literature

*40+10=50 अङ्काः*

**4.** अधोलिखितम् गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित गद्यांश, पद्य एवं नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following prose, poetry and drama passages and answer the given questions in Sanskrit.

(क) **गद्यांशः**

"एवं सकलगुणनिवासः स विक्रमो राजा एकदा स्वमनस्यचिन्तयत् – अहो असारोऽयं संसारः, कदा कस्य किं भविष्यतीति न ज्ञायते । यच्चोपार्जितानां वित्तं तदपि दानभोगैर्विना सफलं न भवति ।"

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) राजा कीदृशः आसीत् ?

(ii) कः असारः अस्ति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. 2

वित्तं कैः विना सफलं न भवति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $1 \times 2 = 2$

(i) 'धनम्' अस्य पर्यायः कः ?

(ii) 'विफलम्' अस्य विलोमपदं किम् ?

(ख) **पद्यम्**

"मनसि वचसि काये पुण्यपीयूषपूर्णा-
स्त्रिभुवनमुपकारश्रेणिभि: प्रीणयन्त: ।
परगुणपरमाणून् पर्वतीकृत्य नित्यं,
निजहृदि विकसन्त: सन्ति सन्त: कियन्त: ।।"

**प्रश्ना:**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2} \times 2 = 1$

(i) त्रिभुवनं कथं प्रीणयन्ति ?

(ii) सन्त: कान् पर्वतीकृत्य नित्यं निजहृदि विकसन्ति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2*

सन्त: कीदृशा: भवन्ति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $1 \times 2 = 2$

(i) 'पापम्' अस्य विलोमपदं किम् ?

(ii) 'सन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(ग) **नाट्यांश:**

"*कौसल्या* — जात ! अस्ति ते माता ? स्मरसि वा तातम् ?

*लव:* — नहि ।

*कौसल्या* — तत: कस्य त्वम् ?

*लव:* — भगवत: सुगृहीतनामधेयस्य वाल्मीके: ।

*कौसल्या* — अयि जात ! कथयितव्यं कथय ।

*लव:* — एतावदेव जानामि ।

(प्रविश्य सम्भ्रान्ता:)

*बटव:* — कुमार ! कुमार ! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयम् अधुनाऽस्माभि: स्वयं प्रत्यक्षीकृत: ।"

प्रश्नाः

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. $\frac{1}{2}\times 2=1$
(i) 'जनकम्' अस्य पर्यायपदं किम् ?
(ii) 'सामान्यः' अस्य विलोमपदं किम् ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2*

जनपदेषु किम् अनुश्रूयते ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $1\times 2=2$
(i) 'अयम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?
(ii) 'जानामि' इति क्रियापदस्य कर्तृपदं किम् ?

**5.** शब्दार्थान् मेलयित्वा लिखत ।
शब्दों का अर्थों से मिलान करके लिखिए ।
Match the words with their meanings and rewrite the same. $\frac{1}{2}\times 4=2$

| | **शब्दः** | | **अर्थः** |
|---|---|---|---|
| (अ) | धूर्तः | (i) | विद्यार्थी |
| (ब) | साम्प्रतम् | (ii) | नभः |
| (स) | शिष्यः | (iii) | इदानीम् |
| (द) | गगनम् | (iv) | दुष्टः |

**6.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।
रेखाङ्कित पदों के आधार पर प्रश्न-निर्माण कीजिए ।
Frame questions on the basis of the underlined words. $1\times 4=4$

(i) तस्याः <u>दार्शनिकैः</u> सप्तधा विभागः कृतः ।

(ii) <u>तस्याः</u> विवाहस्य अद्य तृतीयो दिवसः ।

(iii) <u>भगवद्वाक्यानि</u> समाप्तानि न भवन्ति ।

(iv) <u>धनेन</u> सर्वमपि लभ्यते ।

**7.** अधोलिखित**भावार्थयो**: रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया लिखत ।

निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति करके लिखिए ।

Fill in the blanks in the following **two** explanations with the help of the words given in the box and rewrite the same. $\frac{1}{2} \times 12 = 6$

(अ) "अन्धन्तम: प्रविशन्ति येऽविद्यामुपासते ।

ततो भूय इव ते तमो य उ विद्यायां रता: ।।"

**भावार्थ:**

ये नरा: (i) __________ कर्मफलभावनया यज्ञादि (ii) __________ कुर्वन्ति, ते अज्ञानान्धकारं (iii) __________ इतस्तत: भ्रमन्ति । ये जना: विद्याया: कृते (iv) __________ कुर्वन्ति । ते (v) __________ अन्त:करणस्य शुद्धेरभावात् ततोऽपि (vi) __________ अन्धकारं प्रविशन्ति ।

(ब) "तस्मादसक्त: सततं कार्यं कर्म समाचर ।

असक्तो ह्याचरन्कर्म परमाप्नोति पूरुष: ।।"

**भावार्थ:**

(i) __________ अर्जुनमुपदिशति – 'त्वं निरन्तरं (ii) __________ भूत्वा कर्माणि कुरु । एतदेव (iii) __________ कर्तव्यमस्ति । य: (iv) __________ अनासक्तभावेन कर्माणि करोति स: (v) __________ प्राप्य परमतत्त्वे विलीन: (vi) __________ ।'

**मञ्जूषा**

| |
|---|
| गहनतमम्, ज्ञानाभावे, कर्माणि, प्रविश्य, श्रीकृष्ण:, जन:, भवत:, भवति, अनासक्त:, मुक्तिम्, प्रयत्नम्, अपि । |

**8.** अधोलिखितयो: श्लोकयो: अन्वय**द्वये** रिक्तस्थानपूर्तिं कुरुत ।

निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्त स्थानों की पूर्ति कीजिए ।

Fill in the blanks in the following prose-order-renderings of the **two** verses. $1\frac{1}{2} + 1\frac{1}{2} = 3$

(अ) "तमध्वरे विश्वजिति क्षितीशं

नि:शेषविश्राणितकोषजातम् ।

उपात्तविद्यो गुरुदक्षिणार्थी

कौत्स: प्रपेदे वरतन्तुशिष्य: ।"

**अन्वय:**

उपात्तविद्यो (i) __________ वरतन्तुशिष्य: कौत्स: (ii) __________ अध्वरे नि:शेषविश्राणितकोषजातम् तं (iii) __________ प्रपेदे ।

(ब) "शरीरमात्रेण नरेन्द्र तिष्ठन्
आभासि तीर्थप्रतिपादितर्द्धिः ।
आरण्यकोपात्तफलप्रसूतिः
स्तम्बेन नीवार इवावशिष्टः ।"

**अन्वयः**

नरेन्द्र ! आरण्यकोपात्तफलप्रसूतिः (i) ________ अवशिष्टः नीवारः इव (ii) ________ शरीरमात्रेण तिष्ठन् (iii) ________ ।

**9.** यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत ।
कर्ता एवं क्रियापद चुनिए ।
Select the subject and the verb. $\frac{1}{2}\times 4=2$
(i) सः चपलः कथं दृश्यते ?
(ii) निर्मलापि कालुष्यम् उपयाति बुद्धिः ।

(ब) विशेषणपदं चिनुत ।
विशेषण पद चुनिए ।
Select the adjective. $1\times 2=2$
(i) शिशोरपि दृप्तां वाचं न सहन्ते ।
(ii) घोरा च राज्यसुखसन्निपातनिद्रा भवति ।

(स) अधोलिखितपङ्क्त्योः रेखाङ्कितसर्वनामपदे काभ्यां प्रयुक्ते ?
निम्नलिखित पंक्तियों में रेखाङ्कित सर्वनाम पद किनके लिए प्रयुक्त हुए हैं ?
In the following lines for whom are the underlined pronouns used ? $1\times 2=2$
(i) 'अनया कथमपि दैववशेन परिगृहीताः विक्लवाः भवन्ति राजानः ।'
(ii) 'एष सुघटितदृढशरीरः पत्रमादाय तोरणदुर्गं प्रयाति ।'

(द) अधोलिखितपङ्क्तिभ्यां 'महावातः' तथा 'जलदः' इति पदयोः समानार्थके पदे चित्वा लिखत ।
निम्नलिखित पंक्तियों में से 'महावातः' तथा 'जलदः' पदों के समानार्थक पद चुनकर लिखिए ।
Select and write the synonyms of the words 'महावातः' and 'जलदः' from the following lines. $1\times 2=2$
'तावदकस्मादुत्थितो महान् झञ्झावातः, एकः सायंसमयप्रयुक्तः स्वभाव-वृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः ।'

(य) कः कं कथयति ?

कौन किसको कह रहा है ?

Who is saying this to whom ? $\frac{1}{2}\times 4=2$

(i) 'अधुना मम गमनसमयः समुपागत एव ।'

(ii) 'यास्माकं सम्भावना कृता सा प्राप्तैव ।'

**10.** (अ) अधोलिखितलेखकानां कस्यापि **एकस्य** काव्यस्य नाम लिखत ।

निम्नलिखित लेखकों के किसी **एक** काव्य का नाम लिखिए ।

Write the names of any **one** work of each of the following poets. *1×5=5*

अम्बिकादत्तव्यासः, पं. हृषीकेश-भट्टाचार्यः, भवभूतिः, श्री चन्द्रशेखर-दासः, भारविः ।

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत ।

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए ।

Write the names of the authors of the following works. *1×5=5*

रघुवंशम्, प्रबन्ध-पारिजातः, भामिनीविलासः, कादम्बरी, समुद्र-संगमः ।

## खण्डः घ (SECTION D)

## छन्दोऽलङ्काराः

## छन्द एवम् अलङ्कार

## Metres and Figures of Speech

*20 अङ्काः*

**11.** (अ) प्रश्नान् उत्तरत ।

प्रश्नों के उत्तर दीजिए ।

Answer the questions. *1×2=2*

(i) 'आज्ञया' अत्र को गणः ?

(ii) 'अधुना' अत्र 'ना' इति लघुः गुरुः वा ?

(ब) अधोलिखितपरिभाषाः पूरयत ।

निम्नलिखित परिभाषाओं को पूरा कीजिए ।

Complete the following definitions. *1×4=4*

(i) '_________यदि तौ जगौ गः ।'

(ii) '_________वंशस्थमुदीरितं जरौ ।'

(iii) 'रसैः रुद्रैश्छिन्ना _________ शिखरिणी ।'

(iv) 'मन्दाक्रान्ताम्बुधि _________ गयुग्मम् ।'

(स) अधोलिखितयोः **एकस्य** छन्दसः उदाहरणं लिखत ।

निम्नलिखित में से किसी **एक** छन्द का उदाहरण लिखिए ।
Write an example of any **one** of the following metres. *2*

वसन्ततिलका, मालिनी ।

(द) अधोलिखितपङ्क्त्योः किं किं छन्दः ?

निम्नलिखित पंक्तियों में कौन-कौन-सा छन्द है ?
What is the metre in the following lines ? *1×2=2*

(i) 'प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ।'

(ii) 'निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ।'

**12.** (अ) अधोलिखितयोः कस्यचि**देकस्य** शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत ।

निम्नलिखित में से किसी **एक** शब्दालङ्कार का उदाहरण सहित लक्षण लिखिए ।
Write the definition and example of any **one** of the following Shabdalaṁkaras. *3*

यमकम्, श्लेषः ।

(ब) अधोलिखितस्य कस्यचि**देकस्य** अर्थालङ्कारस्य लक्षणमुदाहरणं च लिखत ।

निम्नलिखित में से किसी **एक** अर्थालङ्कार का लक्षण एवम् उदाहरण लिखिए ।
Define and illustrate any **one** of the following अर्थालङ्कार. *3*

उपमा, अर्थान्तरन्यासः ।

(स) अधोलिखितपङ्क्त्योः अलङ्कारं निर्दिशत ।

निम्नलिखित पंक्तियों में अलङ्कार का निर्देश कीजिए ।

Indicate the figure of speech in the following lines. *1×2=2*

(i) अमङ्गलमिव उपघ्नन्ति विश्वासम् ।

(ii) दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम् ।

(द) अधोलिखितपरिभाषा**द्वयं** पूरयत ।

निम्नलिखित **दोनों** परिभाषाओं को पूर्ण कीजिए ।

Complete the following definitions of the **two** figures of speech. *1×2=2*

(i) 'अनुप्रासः __________ ।'

(ii) '__________ उत्प्रेक्षा प्रकृतस्य परात्मना ।'